# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-5) | **प्रश्नपत्रम्**-८ (New & Old) | **गुणाः** - ७० |
| **विषयः** - पुराणेतिहासः | **कोड**- **CE- 3-5-10** | **समयः** - १० तः १ |
| **दिनाङ्कः** - १२/१२/२०१८ | **सन्दर्भग्रन्थः**- महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीतापर्व १३-४२ अध्यायाः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. जामदग्न्यं रणे रामं योऽयुध्यदपसम्भ्रमः ।
न हतो जामदग्न्येन स हतोऽद्य शिखण्डिना ॥

२. न धृत्या न पुनस्त्यागान्मृत्योः कश्चिद्विमुच्यते ।
कालो नूनं महावीर्यं सर्वलोके दुरत्ययः ॥

३. अधर्मः क्षत्रियस्यैष यद्व्याधिमरणं गृहे ।
यदयं निधनं याति सोऽस्य धर्मः सनातनः ॥

**प्र-२ कस्याप्येकस्योत्तरं विस्तरेण ददातु ।** **१०**

१. व्यूहपूर्वकं युद्धवर्णनं यथाग्रन्थं लिखत ।

२. अर्जुनकृता दुर्गास्तुतिं वर्ण्यताम् ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥

२. हतो वा प्राप्यसि स्वर्गं जित्वा वा मोक्ष्यसे महीम ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृत निश्चय ॥

३. ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

**प्र-४ कस्याप्येकस्योत्तरं विस्तरेण ददातु ।** **१०**

१. अर्जुनस्य विषादं यथाग्रन्थं लिखत ।

२. स्थिप्रज्ञस्य लक्षणानि यथाग्रन्थं लिखत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ श्लोकद्वयं सप्रसङ्गं व्याख्यायताम् ।** **१०**

१. आदित्यानामहं विष्णुर्जोतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥

२. पश्य मे पार्थ रूपाणि शतशोथ सहस्त्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥

३. मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥

**प्र-६ यथाग्रन्थं साधु वर्णयत ।** **१०**

१. भक्तियोगवर्णनं यथाग्रन्थं लिखत ।
२. दैवीसम्पदं तथा आसुरीसम्पदं यथाग्रन्थं लिखत ।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ दशानां लघूत्तराणि लिखत ।** **१०**

१. पाण्डवेषु कौ यमौ आस्ताम्?
२. अर्जुनस्य धनुषः नाम किम्?
३. गुडाकेशः कस्य अपरं नाम?
४. श्रेयः नाम किम्?
५. पर्जन्याद् किं भवति?
६. कर्मसु कौशलं नाम किम्?
७. गीतायाः पञ्चदशाध्यायस्य नाम किम्?
८. कुत्र चन्द्रः न भासयते?
९. ऊर्ध्वं के गच्छन्ति?
१०. शान्तनवः कः ?
११. वासुदेवः कः ?
१२. भगवान कस्मै दिव्यं चक्षुः यच्छति?
१३. चमु शब्दस्य अर्थः कः ?
१४. कौरवस्य प्रथमः सेनापतिः कः ?
१५. अधर्माभिभवात् काः प्रदुष्यन्ति?

--००--